# shAstRi bhuja NgastotraM

# શાસ્તૃ ભુજઙ્ગસ્તોત્રમ્

## Document Information

Text title : shAastabhujangastotram

File name : shaastabhujangastotram.itx

Category : deities_misc, ayyappa, bhujanga

Location : doc_deities_misc

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma, PSA Easwaran

Latest update : July 10, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2021

*sanskritdocuments.org*

# શાસ્તૃ ભુજઙ્ગસ્તોત્રમ્

શ્રિતાનન્દચિન્તામણિશ્રીનિવાસં
સદા સચ્ચિદાનન્દપૂર્ણપ્રકાશમ્ ।
ઉદારં સદારં સુરાધારમીશં
પરં જ્યોતિરૂપં ભજે ભૂતનાથમ્ ॥ ૧॥

વિભું વેદવેદાન્તવેદ્યં વરિષ્ઠં
વિભૂતિપ્રદં વિશ્રુતં બ્રહ્મનિષ્ઠમ્ ।
વિભાસ્વત્પ્રભાવપ્રભં પુષ્કલેષ્ટં
પરં જ્યોતિરૂપં ભજે ભૂતનાથમ્ ॥ ૨॥

પરિત્રાણદક્ષં પરબ્રહ્મસૂત્રં
સ્ફુરચ્ચારુગાત્રં ભવધ્વાન્તમિત્રમ્ ।
પરં પ્રેમપાત્રં પવિત્રં વિચિત્રં
પરં જ્યોતિરૂપં ભજે ભૂતનાથમ્ ॥ ૩॥

પરેશં પ્રભું પૂર્ણકારુણ્યરૂપં
ગિરીશાધિપીઠોજ્જ્વલચ્ચારુદીપમ્ ।
સુરેશાદિ સંસેવિતં સુપ્રતાપં
પરં જ્યોતિરૂપં ભજે ભૂતનાથમ્ ॥ ૪॥

ગુરું પૂર્ણલાવણ્યપાદાદિકેશં
ગરિષ્ઠં મહાકોટિસૂર્યપ્રકાશમ્ ।
કરામ્ભોરુહન્યસ્તવેત્રં સુરેશં
પરં જ્યોતિરૂપં ભજે ભૂતનાથમ્ ॥ ૫॥

હરીશાનસંયુક્તશક્ત્યેકવીરં
કિરાતાવતારં કૃપાપાઙ્ગપૂરમ્ ।
કિરીટાવતંસોજ્જ્વલત્પિઞ્છભારં
પરં જ્યોતિરૂપં ભજે ભૂતનાથમ્ ॥ ૬॥

મહાયોગપીઠે જ્વલન્તં મહાન્તં
મહાવાક્યસારોપદેશં સુશાન્તમ્ ।
મહર્ષિપ્રહર્ષપ્રદં જ્ઞાનકન્દં
પરં જ્યોતિરૂપં ભજે ભૂતનાથમ્ ॥ ૭॥

મહારણ્યમન્માનસાન્તર્નિવાસા-
નહઙ્કાર દુર્વારહિંસ્રાન્મૃગાદીન્ ।
નિહન્તું કિરાતાવતારં ચરન્તં
પરં જ્યોતિરૂપં ભજે ભૂતનાથમ્ ॥ ૮॥

પૃથિવ્યાદિ ભૂતપ્રપઞ્ચાન્તરસ્થં
પૃથગ્ભૂતચૈતન્યજન્યં પ્રશસ્તમ્ ।
પ્રધાનં પ્રમાણં પુરાણં પ્રસિદ્ધં
પરં જ્યોતિરૂપં ભજે ભૂતનાથમ્ ॥ ૯॥

જગજ્જીવનં પાવનં ભાવનીયં
જગદ્વ્યાપકં દીપકં મોહનીયમ્ ।
સુખાધારમાધારભૂતં તુરીયં
પરં જ્યોતિરૂપં ભજે ભૂતનાથમ્ ॥ ૧૦॥

ઇહામુત્રસત્સૌખ્યસમ્પન્નિધાનં
મહદ્યોનિમવ્યાહૃતાત્માભિધાનમ્ ।
અહઃ પુણ્ડરીકાનનં દીપ્યમાનં
પરં જ્યોતિરૂપં ભજે ભૂતનાથમ્ ॥ ૧૧॥

ત્રિકાલસ્થિતં સુસ્થિરં જ્ઞાનસંસ્થં
ત્રિધામત્રિમૂર્ત્યાત્મકં બ્રહ્મસંસ્થમ્ ।
ત્રયીમૂર્તિમાર્તિચ્છિદં શક્તિયુક્તં
પરં જ્યોતિરૂપં ભજે ભૂતનાથમ્ ॥ ૧૨॥

ઇડાં પિઙ્ગળાં સત્સુષુમ્નાં વિશન્તં
સ્ફુટં બ્રહ્મરન્ધ્રસ્વતન્ત્રં સુશાન્તમ્ ।
દૃઢં નિત્ય નિર્વાણમુદ્ભાસયન્તં
પરં જ્યોતિરૂપં ભજે ભૂતનાથમ્ ॥ ૧૩॥

અનુબ્રહ્મપર્યન્તજીવૈક્યબિમ્બં

ગુણાકારમત્યન્તભક્તાનુકમ્પમ્ ।
અનર્ઘં શુભોદર્કમાત્માવલમ્બં
પરં જ્યોતિરૂપં ભજે ભૂતનાથમ્ ॥ ૧૪॥

ઇતિ શાસ્તૃભુજઙ્ગસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Antaratma antaratma at Safe-mail.net

Proofread by Antaratma, PSA Easwaran

---

*shAstRi bhuja NgastotraM*

pdf was typeset on July 10, 2021

Please send corrections to *sanskrit@cheerful.com*